॥ নমশ্ শিবায় শান্তায় কারণত্রয়হেতবে ।
নিবেদয়ামি চাত্মানং ত্বং গতিঃ পরমেশ্বর ॥

## ॥ প্রথমোঽধ্যায়ঃ ॥

## ॥ সিদ্ধিগ্রন্থা অদ্বৈতবাদে তেষাং স্থানঞ্চ ॥

অদ্বৈতবাদঃ সুপ্রাচীনো বৈদিকশ্চ । নায়ং বাদঃ কেনাপ্যুৎপ্রেক্ষিতঃ । অত প্রাচীনকালাদদ্বৈতাচার্যা অদ্বৈততত্ত্বস্থাপনে সুদৃঢ়ং যতনং কৃতবন্তঃ । সর্বমিদম্ পরিষ্টাদ্ বিস্পষ্টীভবিষ্যতি ।

তত্রাদ্বৈতবাদো নাম দ্বৈতবিরোধী বাদঃ । অদ্বৈতবাদে দৃশ্যমানজগৎপ্রপঞ্চস্যাসত্ত্বর্থান্ মিথ্যাত্বং, ব্রহ্মণশ্চ পারমার্থিকং সত্ত্বং স্বীকৃতম্ ।

অদ্বৈতবাদিভির্বহুভিঃ প্রকরণাদিভির্গ্রন্থৈরদ্বৈততত্ত্বং ব্যাখ্যাতম্ । তত্র বিশেষেণ সিদ্ধিগ্রন্থেষ্বদ্বৈতবাদঃ সুদৃঢ়তয়া প্রতিষ্ঠাপিতঃ । অতএবাদ্বৈতমতে সিদ্ধিগ্রন্থানাং সুচ্চং স্থানং বিদ্যত এব । তত্রাদ্বৈততত্ত্বপ্রতিপাদনপরাঃ সন্তি

বহবঃ সিদ্ধিগ্রন্থাঃ । তথাহি - বসুবন্ধুকৃতা বিজ্ঞানমাত্রাসিদ্ধিঃ, ভরতমিশ্র-রচিতা স্ফোটসিদ্ধিঃ, মণ্ডনমিশ্রবিরচিতাঽপি স্ফোটসিদ্ধিঃ, সদানন্দযতিবিরচি-তাঽদ্বৈতব্রহ্মসিদ্ধিঃ, শ্রীধরাচার্যাণামদ্বয়সিদ্ধিঃ স্বারাজ্যসিদ্ধিশ্চ সিদ্ধিগ্রন্থাঃ সন্তি । এবমেবোদয়নাচার্যবিরচিতা প্রবোধসিদ্ধিঃ, যামুনাচার্যাণামীশ্বরসিদ্ধিঃ সম্বিৎসিদ্ধিঃ, আত্মসিদ্ধিশ্চেতি সিদ্ধিগ্রন্থা অপি পরিলক্ষ্যন্তে ।

পরন্তু, সৎস্বপি বহুষু সিদ্ধিগ্রন্থেষু মণ্ডনমিশ্রপাদানাং ব্রহ্মসিদ্ধিগ্রন্থঃ, সুরেশ্বরাচার্যাণাং নৈষ্কর্ম্যসিদ্ধিঃ, বিমুক্তাত্মযতিপাদকৃতেষ্টসিদ্ধির্মধুসূদনসরস্বতী-পাদানাঞ্চাদ্বৈতসিদ্ধিরিতি গ্রন্থচতুষ্টয়মেব সর্বৈরদ্বৈতিভিঃ সমাদ্রিয়তেতরাম্ ।

তত্রভবদ্ভির্মধুসূদনসরস্বতীচরণৈরদ্বৈতসিদ্ধিগ্রন্থস্যান্তিমে ভাগেঽস্যা-দুক্তচর্তুণাং সিদ্ধিগ্রন্থানামুল্লেখঃ কৃতঃ । তদুক্তং তত্র তৈঃ, "সিদ্ধীনামিষ্টনৈষ্কর্ম্য-ব্রহ্মাণামিয়ং চিরাৎ । অদ্বৈতসিদ্ধিরধুনা চতুর্থী সমজায়ত ॥" ইতি (অ.সি. দিল্লী সং, পৃ.৯০০)।

সর্বেষু চৈতেষু সিদ্ধিগ্রন্থেষু দ্বৈতমিথ্যাত্বপ্রতিপাদনেনাঽদ্বৈততত্ত্বং সুদৃঢ়েন যুক্তিজালেন প্রতিপাদিতং, যতো হ্যদ্বৈতসিদ্ধ্যর্থং দ্বৈতমিথ্যাত্বমবশ্য-

মেবোপপাদনীয়ম্। তদুক্তমদ্বৈতসিদ্ধিগ্রন্থস্য প্রারম্ভে শ্রীমন্মধুসূদনসরস্বতীচরণৈঃ,
"তত্রাদ্বৈতসিদ্ধের্দ্বৈতমিথ্যাত্বসিদ্ধিপূর্বকত্বাদ্ দ্বৈতমিথ্যাত্বমেব প্রথমমুপপাদনীয়ম্।"
ইত্যাদিকম্ (অ.সি., দি.সং., পৃ.৮)।

তত্রাদ্বৈততত্ত্বপ্রতিপাদনমেবৈতেষাং সিদ্ধিগ্রন্থানামভিপ্রেতম্। এতদর্থং ব্রহ্মসিদ্ধ্যাদিগ্রন্থচতুষ্টয়স্য প্রতিপাদ্যবিষয়পর্যালোচনদ্বারা সিদ্ধিগ্রন্থানামদ্বৈতবেদান্তে তাৎপর্যং স্থানঞ্চোপবিষ্টাঞ্চ প্রদর্শ্যতে।

# ॥ ইষ্টসিদ্ধিঃ ॥

অদ্বৈতবাদিভির্বিমুক্তাত্মযতিপাদানামিষ্টসিদ্ধিগ্রন্থোঽতিশয়েন সমাদ্রিয়তে। তত্রভবদ্ভির্বিমুক্তাত্মপাদৈরস্মিন্ গ্রন্থে স্বপ্রতিভয়া স্বাতন্ত্র্য-মাশ্রিত্য তর্কৈর্বিশ্বপ্রপঞ্চস্য মায়াত্মকত্বং সূপপাদিতম্। অথ চৈত্ব চ, অদ্বৈতসিদ্ধি-গ্রাহেতদ্যস্য গ্রন্থস্যাভিপ্রায়ঃ।

অষ্টাধ্যায়াত্মকেঽস্মিন্ গ্রন্থে মঙ্গলশ্লোককথনদ্বারেণৈব প্রপঞ্চস্য মায়াত্মকত্বং ব্রহ্মণশ্চ চিত্রভিত্তিরূপেণ তদাশ্রয়ত্বমিতি বিস্পষ্টীকৃতম্। তদুক্তং তত্র তৈঃ, "যানুভূতিরজামেয়ানন্তাত্মানন্দবিগ্রহা মহদাদিজগন্মায়াচিত্রভিত্তিং নমামি তাম্॥" ইতি (ইষ্টসিদ্ধিঃ, বরোদা সংস্করণং, পৃষ্ঠা. ১)।

তত্র প্রথমাধ্যায়ে দৃগ্দৃশ্যভেদো নিরাকৃতঃ। ধর্মধর্মিরূপেণ বা স্বরূপেণ বা নৈব ভেদঃ কথমপি কেনাপি প্রমাণেন গ্রহীতুং শক্যত ইতি প্রদর্শ্যাঽঽত্মন আনন্দস্বরূপত্বাদিকমখণ্ডার্থত্বঞ্চ প্রদর্শ্য প্রপঞ্চস্য মায়াময়ত্বং প্রতিষ্ঠাপিতম্। "রজতং ভাতি যদ্ভ্রান্তৌ তৎ সদেকে পরে ত্বসৎ। অন্যেঽনির্বচনীয়ং তদাহুস্তেন বিচার্যতে॥" (ই. সি., বরোদা সং., পৃ. ৩৯) ইত্যাদিগ্রন্থেন তত্রেতরেষাং খ্যাতিবাদানামনির্বচনীয়খ্যাতৌ পর্যবসানমুক্তম্।

এতচ্চোক্তেষ্বধ্যায়েষু বিস্তরশঃ প্রদর্শিতম্। তত্র ক্ষণিকস্য কারণত্বং নিরস্তম্। অজ্ঞানস্বরূপে বিপ্রতিপত্তীর্নিরাকৃত্যাজ্ঞানস্য সাক্ষিমাত্রবেদ্যত্বম্, অভাবব্যাবৃত্তভাবরূপত্বঞ্চ প্রসাধিতম্। অত্র ভেদাভেদবাদনিরাকরণং, শব্দাদ্বৈতবাদখণ্ডনং, পরিণামবাদখণ্ডনম্, অবিদ্যায়া আত্মাশ্রিতত্বং, বেদান্তানামদ্বৈতে ব্রহ্মণি প্রামাণ্যমিত্যাদিবিষয়া বিবেচিতাঃ।

তত্র দ্বিতীয়াধ্যায়ে আত্মনোঽন্যথাভাবনিরাকরণং, সপ্রপঞ্চব্রহ্মবাদনিরাকরণং, অথা ভাবস্যান্যথাভাবাযোগশ্চ প্রপঞ্চিতঃ।

তৃতীয়চতুর্থপঞ্চমাধ্যায়েষু খ্যাতিবিষয়কং বিস্তৃতমালোচনং কৃতম্। সর্বেষাং খ্যাতিবাদানাং নিরাকরণং প্রদর্শ্যানির্বচনীয়খ্যাতাবেব তাসাং পর্যবসানং প্রতিষ্ঠাপিতম্।

ষষ্ঠাধ্যায়ে ব্রহ্ম এবাঽবিদ্যাঽঽশ্রয়ত্বং বিষয়ত্বঞ্চেতি সমুপপাদিতম্। তদুক্তং, "অতোঽবিদ্যাকৃতং বন্ধং বিদ্যয়া হন্তুমিচ্ছতা। এষ্টব্যা ব্রহ্মণোঽবিদ্যা ন তয়া কল্পিতস্য সা॥" ইতি (ই. সি., বরোদা সং., পৃ. ৩৬৪)।

সপ্তমাধ্যায়ে দ্বৈতবাদো দেহাত্মবাদঃ প্রধ নিবাদশ্চ প্রাধান্যেন নিরাকৃতাঃ ।

অষ্টমাধ্যায়েঽবিদ্যানিবৃত্তিঃ, অবিদ্যানিবৃত্তেঃ পঞ্চমপ্রকারত্ব-স্বাভিনবরূপেণ প্রদর্শিতম্ ।

এতাবতানেন গ্রন্থেন প্রাধান্যেন দ্বৈতমিথ্যাত্বং দ্বৈতস্য মায়াময়ত্বঞ্চ প্রতিষ্ঠাপ্যাদ্বৈতবাদঃ সুদৃঢ়তয়া প্রতিষ্ঠাপিত ইত্যস্য গ্রন্থস্য নামকরণপর্যালোচনেনাস্মাভিরুপলভ্যতে । তদুক্তং বিমুক্তাত্মপাদৈঃ, "অতো মায্যাদ্বৈতকো ময়েষ্টঃ সিদ্ধঃ ।" ইতি (ই. সি., বরোদা সং., পৃ. ১৩৪)। কিন্তু, প্রপঞ্চস্য মায়িকত্বপ্রদর্শনেনাদ্বৈতবাদঃ সমায়াতীত্যপ্যনেন গ্রন্থেন বিস্পষ্টীকৃতম্ । অতএবাদ্বৈতনয়ে মায়াবাদপ্রতিষ্ঠয়া জগন্মিথ্যাত্বপ্রতিপাদ-নেনাদ্বৈততত্ত্বপ্রতিপাদনপরস্যাস্য গ্রন্থস্য মহদুপযোগিত্বমঙ্গীকৃতম্ ।

## ।। নৈষ্কর্ম্যসিদ্ধিঃ ।।

নৈষ্কর্ম্যসিদ্ধিগ্রন্থঃ শ্রীসুরেশ্বরাচার্যবিরচিত ইতি নিশ্চপ্রচমেব । অস্মিন্ গ্রন্থে শঙ্করাচার্যপাদানাং মতমাশ্রিত্য বিবিধবিষয়াঃ সমুপস্থাপিতাঃ, তথা শ্রুত্যাদিসংযোগেন স্বকীয়মতমবলম্ব্য বহবো বিষয়াঃ সন্নিবিষ্টাঃ । অত্র জ্ঞানকর্মসমুচ্চয়বাদঃ খণ্ডিতঃ, তত্ত্বমস্যাদিবেদান্তবাক্যজন্যজ্ঞানমেবাজ্ঞাননাশক-মিতি চ সবিস্তরং প্রতিপাদিতম্ । অদ্বৈতজ্ঞানোদয়ে প্রারব্ধং কর্ম বিনা সঞ্চিতক্রিয়মাণকর্মণাং নাশঃ, অদ্বৈতজ্ঞানমেব মোক্ষহেতুঃ, তত্র নাস্তি কর্মলবাপেক্ষেতি সর্বমস্মিন্ গ্রন্থে বিশেষেণ প্রতিষ্ঠাপিতম্ । তেন চ পূর্বমীমাংসয়োত্তরমীমাংসায়া গতার্থত্বং ন ভবতীতি বিস্পষ্টীকৃতম্ ।

তত্র প্রথমাধ্যায়ে কর্মণো মোক্ষকারণত্বং খণ্ডিতং, নিত্যনৈমিত্তি-ককর্মণাঞ্জ্ঞাঽরাদুপকারকত্বমুক্তম্ । তদুক্তং, "প্রত্যক্প্রবণতাং বুদ্ধেঃ কর্মাণ্যুৎপাদ্য শুদ্ধিতঃ । কৃতার্থান্যস্তমায়ান্তি প্রাবৃডন্তে ঘনা ইব ।।" ইতি (নৈষ্কর্ম্যসিদ্ধিঃ, পুণা সংস্করণং, পৃষ্ঠা ৩১, শ্লোকঃ ১।৪৯)। অত্রৈব জ্ঞানকর্মসমুচ্চয়বাদোঽপি সুদৃঢেন যুক্তিজালেন নিরাকৃতঃ । তদুক্তং, "হেতুস্বরূপকার্যাণি প্রকাশতমসোরিব । বিরোধিনী ততো নাস্তি সাঙ্গত্যং জ্ঞানকর্মণোঃ ।।" ইতি (নৈ.সি., পু.সং.,

পৃ.৩৮, শ্লো.১১৬৬)। মোক্ষং প্রতি জ্ঞানস্যৈব নৈরপেক্ষ্যেণ হেতুত্বং প্রদর্শিতম্।

দ্বিতীয়াধ্যায়ে - 'অহং ব্রহ্মাস্মী'ত্যাদিমহাবাক্যানামদ্বৈততত্ত্ব-প্রতিপাদকত্বমিতি প্রদর্শ্য দ্বৈতস্য মিথ্যারূপত্বমিতি প্রপঞ্চিতম্। আত্মনঃ কূটস্থনিত্যত্বং স্বতঃসিদ্ধত্বমদ্বিতীয়ত্বঞ্চ প্রদর্শিতম্। অবিদ্যানিমিত্ত এবাত্মাঽ-নাত্মনোরিতরেতরাধ্যাসঃ, আত্মজ্ঞানেন চাঽবিদ্যানিবৃত্তিঃ, শ্রুত্যুপদেশে-নৈবাদ্বৈতজ্ঞানমস্মর্থস্য চানাত্মত্বমিতি বিষয়াঃ প্রপঞ্চিতাঃ।

তৃতীয়াধ্যায়ে - আত্মন এবাজ্ঞানাশ্রয়ত্বমজ্ঞানবিষয়ত্বঞ্চেতি প্রতিপাদ্য তত্ত্বমস্যাদিমহাবাক্যোত্থং জ্ঞানমেবাজ্ঞাননিবর্তকমিতি প্রতিষ্ঠাপিতম্। 'দশমস্ত্বমসী'ত্যাদিদৃষ্টান্তেন বাক্যাদেব প্রত্যক্ষপ্রমাদর্শনাচ্ছাব্দাঽপরোক্ষবাদোঽত্র সুরেশ্বরাচার্যপাদৈরঙ্গীকৃতঃ। প্রসংখ্যানবাদোঽত্র নিরাকৃতঃ। আত্মাঽনাত্মনো-র্বিবেকং প্রদর্শ্যাজ্ঞানং সাক্ষিমাত্রভাস্যং, ন তু প্রমাণবেদ্যমিত্যপি প্রকটীকৃতম্।

তত্র চতুর্থাধ্যায়ে - আত্মজ্ঞানিনো নাস্তি যথেষ্টাচরণশঙ্কেতি বিচার্য প্রতিপাদিতম্। তদুক্তম্, "অধর্মাজ্ জায়তেঽজ্ঞানং যথেষ্টাচরণং ততঃ।

ধর্মকার্যে কথং তৎ স্যাদ্ যত্র ধর্মোঽপি নেষ্যতে ॥" ইতি (নৈ. সি., পূ. সং., পৃ. ২০০, শ্লো. ৪।৬৩)। সুষুপ্তিদৃষ্টান্তেনাত্মনো দ্বৈতসংসর্গাভাব উপপদ্যতে, ন তজ্জ্ঞানাভাব ইতি প্রদর্শ্য ক্রিয়াকারকফলশূন্যমাত্মতত্ত্বং সর্বকর্মফলং ত্যজত এব স্ফুরতি তত্ত্বমস্যাদিমহাবাক্যোত্থেন জ্ঞানেন, ন ত্বন্যস্য, ন বা কেনাপ্যন্যেনোপায়েনেতি বিষয়োঽত্র প্রপঞ্চিতঃ। তদুক্তং, "নিরস্তসর্বকর্মাণঃ প্রত্যক্প্রবণবুদ্ধয়ঃ। নিষ্কামা যতয়ঃ শান্তা জানন্তীদং যথোদিতম্ ॥" ইতি (নৈ. সি., পূ. সং., পৃ. ২০৩, শ্লো. ৪।৭৩)।

## ॥ ব্রহ্মসিদ্ধিঃ ॥

ব্রহ্ম-তর্ক-নিয়োগ-সিদ্ধ্যাখ্যকাণ্ডচতুষ্টয়াত্মকো ব্রহ্মসিদ্ধিগ্রন্থঃ । অদ্বৈততত্ত্বপ্রতিপাদনে, অথো পূর্বমীমাংসকমতখণ্ডনেনোত্তরমীমাংসারূপস্য বেদান্তস্য পৃথগাবশ্যকত্বপ্রদর্শনেঽস্য গ্রন্থস্যাদ্বৈতবেদান্তেঽসাধারণত্বম্ ।

তত্র গ্রন্থস্যাদৌ বেদান্তেষু প্রামাণ্যাদিবিপ্রতিপত্তিনিরাসার্থং ব্রহ্মস্বরূপবিষয়ে বিরোধিমতনিরাকরণার্থঞ্চ সংক্ষেপেণ মঙ্গলশ্লোক উপস্থাপিতঃ, "আনন্দমেকমমৃতমজং বিজ্ঞানমক্ষরম্ । অসর্বং সর্বমভয়ং নমস্যামঃ প্রজাপতিম্ ॥" ইতি (ব্রহ্মসিদ্ধিঃ, মাদ্রাজ সংস্করণং, পৃ. ১)। তত্রাদ্যে ব্রহ্মকাণ্ডেঽবিদ্যানাশোপায় উক্তঃ, অসত্যাদপি শাস্ত্রাৎ সত্যপ্রতিপত্তিরিতি প্রদর্শনার্থং বিষেণ বিষনাশঃ, কতকচূর্ণেনাম্বুনো মালিন্যনাশ ইতি দৃষ্টান্ত উপস্থাপিতঃ । ব্রহ্মণঃ শব্দমাত্রগম্যত্বং, শব্দাত্মকত্বং, মুক্তানাং পুনরাবৃত্তিশঙ্কাভাব ইত্যাদিবিষয়াঃ প্রতিপাদিতাঃ । অত্রাপি কর্মণাং চিত্তমলক্ষালনদ্বারেণাঽঽত্মজ্ঞানোপযোগিত্বং প্রদর্শিতম্ । তদুক্তং তত্র তৈঃ, "অভ্যাসো হি সংস্কারং ভয়েন পূর্বসংস্কারং প্রতিবধ্য স্বকার্যং সংতনোতি, যজ্ঞাদয়শ্চ কেনাপ্যদৃষ্টেন প্রকারেণ, শ্রেয়ঃপরিপন্থিকল্মষনিবর্হণ-দ্বারেণেত্যন্যে ।" ইতি (ব্র.সি., মা.সং, পৃ. ৩৫)।

দ্বিতীয়ে তর্ককাণ্ডে ন্যায়োপবৃংহিতৈরনুমানাদিভিরদ্বৈততত্ত্বং প্রতিষ্ঠাপিতম্। অস্মিন্ কাণ্ডে প্রত্যক্ষাদিপ্রমাণৈঃ সার্ধমাগমস্য বিরোধে কতরস্য কথং বলীয়স্ত্বং স্যাদিতি বিস্পষ্টং প্রতিপাদিতম্। আগমস্যোৎপত্তৌ প্রত্যক্ষাদিপ্রমাণাপেক্ষায়ামপি জ্ঞপ্তৌ প্রত্যক্ষাদিপ্রমাণাপেক্ষা নাস্তি, প্রমাণানাং স্বার্থে নিরপেক্ষত্বাদিতি প্রপঞ্চিতম্। আগমস্য স্বতঃপ্রামাণ্যাৎ স্বাতন্ত্র্যাভাবাদ-পৌরুষেয়ত্বাচ্চ পৌরুষেয়দোষশূন্যতয়া সকলপ্রমাণাপেক্ষয়া প্রাবল্যম্, ইতরেষান্তু প্রমাণানাং বিবিধদোষদুষ্টতয়া দৌর্বল্যমিত্যত্র নির্ণীতম্। কিন্তু, ভেদে কিমপি প্রমাণং নাস্তি, স্বরূপতো বা ধর্মধর্মিরূপেণ বা, অন্যেন কেনাপি প্রকারেণ বা নৈব ভেদঃ প্রমাপয়িতুং শক্যত ইত্যস্মিন্ কাণ্ডে বিচারিতম্।

তৃতীয়ে নিয়োগকাণ্ডে উপনিষদং ব্রহ্মজ্ঞানং চোদনাবাক্যৈর্নৈব প্রতিপাদয়িতুং প্রতিপত্তুং বা শক্যত ইতি প্রদর্শ্যোপনিষন্মাত্রবেদ্যং ব্রহ্মেতি প্রপঞ্চিতম্। ব্রহ্মজ্ঞানফলরূপস্য মোক্ষস্য নিত্যসিদ্ধত্বাদদ্বয়রূপত্বাচ্চ নৈব বিধিবিষয়ত্বমিত্যপি প্রদর্শিতম্। ব্রহ্মজ্ঞানমাত্রেণৈব তৎক্ষণ এব দেহপাতঃ স্যান্ন বেতি বিচার্য জীবন্মুক্তস্য বিশিষ্টসাধকাবস্থেতি চ প্রদর্শ্য বিদেহকৈবল্যমুক্তি-রঙ্গীকৃতা। শাব্দজ্ঞানং পরোক্ষমিতি প্রতিপাদ্য শ্রবণমননিদিধ্যাসনজন্য-মেবাপরোক্ষাত্মজ্ঞানমিতি স্বীকৃতম্। তদুক্তং তত্র হি তু "উচ্যতে পরোক্ষরূপং

শাব্দজ্ঞানং, প্রত্যক্ষরূপস্তু প্রপঞ্চাবভাসঃ, তেন তয়োরবিরোধেন প্রপঞ্চাবভাসো নাত্মাসংস্পর্শী।" ইত্যাদিকম্ (ব্র. সি., মা. সং, পৃ. ১৩৪)। ইতরেষাং খ্যাতিবাদানাং খণ্ডনং প্রদর্শ্য তেষামন্যথাখ্যাতাবাপাতস্তু পর্যবসানং যদত্র প্রদর্শিতং, তদ্ভিত্তরেষাং খ্যাতিবাদানাং খণ্ডনার্থমেব, ন তু তাবতা মণ্ডনমিশ্রপাদৈরন্যথাখ্যাতিবাদসমর্থনং কৃতমিতি বেদিতব্যম্। বিধিবলাদ্ ব্রহ্মস্বরূপোপপত্তির্নৈব প্রতিপাদয়িতুং শক্যতে, বেদান্তানামুপাসনাবিধিপরত্বং নাস্তি, ধর্মস্যৈব চোদনাবাক্যগম্যত্বং, ন তু বেদার্থসামান্যস্যাপীত্যত্র প্রদর্শ্য ব্রহ্ম উপনিষন্মাত্রগম্যত্বমিত্যাদিবিষয়া বিস্পষ্টীকৃতাঃ।

চতুর্থে সিদ্ধিকাণ্ডে চ তত্ত্বমস্যাদিবেদান্তমহাবাক্যানামেব ব্রহ্মসাক্ষাৎকারার্থং প্রামাণ্যমিতি প্রদর্শিতম্।

ব্রহ্মসিদ্ধিগ্রন্থে জীবপরয়োরৈক্যপ্রতিপাদকানাং প্রাচীনমীমাংসকানাং প্রতিপত্তিবিধিমাশ্রিত্য সুবিস্তৃতং মতবৈচিত্র্যমুপস্থাপিতম্। সর্বেষামেব প্রাচীনমীমাংসকানাং মতং খণ্ডয়িত্বা প্রতিপত্তিবিধিবলাদদ্বয়ব্রহ্মস্বরূপসিদ্ধির্নৈব ভবিতুমর্হতি, পরন্তু, তত্ত্বমস্যাদিমহাবাক্যানাং সমন্বয়াদেব বিশুদ্ধং ব্রহ্মতত্ত্বং প্রতিপাদয়িতুং শক্যত ইত্যত্র ব্রহ্মসিদ্ধিগ্রন্থে বিশেষেণ প্রপঞ্চিতম্। তত্রৈব চ বাদরায়ণীয়শাস্ত্রস্য পৃথগারম্ভণীয়ত্বমপি প্রতিষ্ঠাপিতম্।

## ॥ অদ্বৈতসিদ্ধিঃ ॥

মধুসূদোক্তেষু চতুর্ষু সিদ্ধান্তগ্রন্থেষ্বভিনবোঽয়ং শ্রীমন্মধুসূদনসরস্বতীপাদ-বিরচিতোঽদ্বৈতসিদ্ধিগ্রন্থঃ। তত্র "সিদ্ধীনামিষ্টনৈষ্কর্ম্যব্রহ্মাণামিয়ং চিরাৎ। অদ্বৈতসিদ্ধিরধুনা চতুর্থী সমজায়ত ॥" ইতি স্বয়মেব গ্রন্থকৃদ্ভিরুক্তম্ (অদ্বৈতসিদ্ধিঃ, দিল্লী সংস্করণং, পৃষ্ঠা ৯০০)।

ব্যাসরাজবিরচিতে ন্যায়ামৃতগ্রন্থেঽদ্বৈতবাদঃ খণ্ডিতঃ। ন্যায়ামৃত-কারাণাং যুক্তিজালং ব্যুদস্যাদ্বৈতবাদং সুদৃঢ়তয়া সংস্থাপয়িতুং তত্রভবদ্ভিরদ্বৈত-সিদ্ধিকৃদ্ভিঃ সুমহৎ প্রযত্নং গ্রন্থেঽস্মিন্ কৃতম্।

তত্র চতুরধ্যায়াত্মকেঽদ্বৈতসিদ্ধিগ্রন্থেঽদ্বৈতবাদপ্রতিষ্ঠাপনার্থং দ্বৈতমিথ্যাত্বমেব প্রথমমুপপাদিতম্। ন হ্যদ্বৈতসিদ্ধির্দ্বৈতমিথ্যাত্বস্থাপনং বিনা সমস্তি। তত্র প্রথমাধ্যায়ে বিপ্রতিপত্তিবাক্যানাং বিচারার্হত্বং, প্রপঞ্চস্য মিথ্যাত্বং, মিথ্যাত্বমিথ্যাত্বঞ্চ নিরূপ্য চিৎসুখীয়মিথ্যাত্বনিরুক্তিরপি প্রদর্শিতা। প্রত্যক্ষস্যাগম-বাধ্যত্বং প্রতিপাদ্যাপচ্ছেদন্যায়বৈষম্যমপাকৃতম্। মিথ্যাত্ববিচারাবসরে বিশেষেণা-নুমানানি প্রদর্শ্য দৃগ্দৃশ্যয়োঃ সম্বন্ধানুপপত্তিরুপপাদিতা। মিথ্যাত্বশ্রুতিমাশ্রিত্যা-দ্বৈতশ্রুতেঃ প্রতিষ্ঠাপনং কৃতং, বিরোধখণ্ডনেন চাদ্বৈততত্ত্বং প্রতিপাদিতম্। সরস্বতীচরণৈর্দৃষ্টিসৃষ্টিবাদোঽঙ্গীকৃতঃ। তদুক্তং, "সর্বলোকাদিসৃষ্টিশ্চ

তত্তদ্দৃষ্টিব্যক্তিমভিপ্রেত্য, যদা যৎ পশ্যতি, তৎসমকালং তৎ সৃজতি তত্র তাৎপর্যাৎ।" ইতি (অ.সি., দি.সং., পৃ.৫৩৭)। অত্রাজ্ঞানলক্ষণং নিরূপ্য তস্য প্রত্যক্ষত্বমুপপাদ্যানুমানাগমগম্যত্বমপি প্রদর্শিতম্। তস্য শুদ্ধচিন্নিষ্ঠত্বং জীবাশ্রয়ত্বমপি চ প্রতিপাদিতম্। তদুক্তং, "জীবাশ্রিতায়া অবিদ্যায়া এব জীবেশকল্পকত্বেনৈতদ্ বিকল্পানবকাশাৎ। তস্মাজ্ জীবাশ্রয়ত্বেঽপ্যদোষঃ।" ইতি (অ.সি., দি.সং., পৃ.৫৮৫)। অহমর্থস্যানাত্মত্বং নিরূপ্যাঽঽত্মনি কর্তৃত্বভোক্তৃত্বাদেরধ্যাসঃ প্রদর্শিতঃ। অত্রান্যথাখ্যাতিবাদো নিরাকৃতঃ, তদুক্তং, "নাপ্যন্যত্র স্থিতস্য রূপ্যস্য ভানাদন্যথাখ্যাতিঃ, অত্যন্তাসত ইবান্যত্র সতোঽপ্যপরোক্ষপ্রতীতিপ্রযোজকসন্নিকর্ষানুপপত্তেস্তুল্যত্বাৎ।" ইতি (অ.সি., দি.সং., পৃ.৬৪৭)। সত্তাত্রৈবিধ্যমুপপাদ্য ভ্রমবিষয়কং বৃত্তিদ্বয়ঞ্চোপপাদিতম্।

দ্বিতীয়াধ্যায়ে – অখণ্ডার্থলক্ষণং নিরূপ্য প্রমাণপ্রদর্শনেন ব্রহ্মণো নির্গুণত্বং নিরাকারত্বঞ্চ প্রদর্শিতম্। তত্র ব্রহ্মণো জ্ঞানরূপত্বং প্রপঞ্চস্য নিমিত্তকারণত্বমুপাদানকারণত্বঞ্চোপপাদ্য তস্য স্বপ্রকাশত্বমশব্দত্বঞ্চ প্রমাণাদিনা নিরূপিতম্। তদুক্তং, "নির্ধর্মকতয়াঽবেদ্যতয়া চ ব্রহ্মানন্দাদিপদলক্ষ্যং, ন বাচ্যং, প্রবৃত্তিনিমিত্তাভাবাৎ।" ইতি (অ.সি., দি.সং., পৃ.৭৮৪)। অত্র সামান্যতো বিশেষতশ্চ ভেদখণ্ডনং কৃত্বৈকজীববাদো বহুজীববাদঃ, তত্ত্বমস্যাদিমহাবাক্যার্থতাৎপর্যঞ্চেতি বিষয়া বিস্তৃততয়াঽঽলোচিতাঃ। জীবপরয়োরভেদে প্রামাণ্যমুপন্যস্য তয়োরৈক্যঞ্চ প্রতিপাদ্য জীবাণুত্বং খণ্ডিতম্।

তত্র তৃতীয়াধ্যায়ে মননিদিধ্যাসনয়োঃ শ্রবণাঙ্গত্বং নিরূপিতম্। শ্রবণে বিধিমঙ্গীকৃত্য বেদানুবিচারস্য শ্রবণবিধিমূলত্বং প্রতিপাদিতম্। জ্ঞানস্য পুরুষতন্ত্রত্বং খণ্ডয়িত্বা বিধিগম্যত্বমপি নিরাকৃতং, জ্ঞানস্য চ শাব্দাপরোক্ষত্বমপ্যুপপাদিতম্। তদুক্তং, "তস্মাত্তত্ত্বমস্যাদিবাক্যস্যাপরোক্ষজ্ঞানজনকত্বাদবিদ্যানিবৃত্ত্যাত্মকমোক্ষসাধনত্বস্য সাক্ষাৎকারায় মননাদ্যঙ্গকং শ্রবণমঙ্গি নিয়মবিধিবিষয় ইতি সিদ্ধম্॥" ইতি (অ.সি., দ্বি.সং, পৃ.৮৭৭)। "তস্মাৎ প্রত্যবেক্ষিতমাজ্যমিত্যাদাবপি জ্ঞানস্যাবিধানাদ্ ধ্যানস্যাপি বিজ্ঞানব্যতিরেকসাধনাৎ সূক্ষ্মাস্ত্রার্থবুদ্ধৌ কৃতান্বয়ব্যতিরেকয়োস্তৎসন্নিধানবিষয়তয়ান্যথাসিদ্ধত্বাচ্চ নাত্মজ্ঞানং বিধাতুং শক্যতে।" ইতি চ (অ.সি., দ্বি.সং., পৃ.৮৭৫)।

চতুর্থাধ্যায়ে - অবিদ্যানিবৃত্তিস্বরূপাদিকঞ্চ বিবেচিতম্।

অবিদ্যানিবৃত্তেঃ পঞ্চমপ্রকারত্বং যদিষ্টসিদ্ধিকৃদ্ভিরভিনবরূপেণোক্তং তদপি বিবেচিতম্। তদুক্তং, "তস্মাদজ্ঞানহানিরাত্মস্বরূপং তদাকারা বৃত্তির্বেতি সিদ্ধম্। যে তু পঞ্চমপ্রকারাদিপক্ষাঃ, তে তু মন্দবুদ্ধিব্যুৎপাদনার্থা ইতি ন তৎসমর্থনমর্থয়ামঃ॥" ইতি (অ.সি., দ্বি.সং, পৃ.৮৮৫)। তত্র চাবিদ্যালেশানুবৃত্ত্যা জীবন্মুক্তিরদ্বৈতসিদ্ধিকৃদ্ভিঃ সম্যগুপপাদিতা। তদুক্তং, "তস্মাদবিদ্যালেশানুবৃত্ত্যা জীবন্মুক্তিরুপপন্নতরা॥" ইতি (অ.সি., দ্বি.সং., পৃ.৮৯২)। মুক্তেরানন্দস্বরূপত্বাৎ পুরুষার্থত্বং

নিরূপিতং, মুক্তৌ চ তারতম্যং কিঞ্চন নাস্তীতি প্রতিপাদিতম্। তদুক্তং,
"তস্মাৎ স্বরূপানন্দস্য স্বপ্রকাশাত্মরূপিণঃ। প্রাপ্তৈর্মুক্তৈর্ন তত্রাস্তি তারতম্যং কথঞ্চন ॥"
ইতি (অ.সি., দি.সং., পৃ. ৮৯৯)।

অদ্বৈতবাদসিদ্ধ্যর্থং দ্বৈতবাদনিরাসস্তথা দ্বৈতস্য মিথ্যাত্বমদ্বৈতসিদ্ধি-গ্রন্থে যথা সুবিস্তৃততয়া বিচারিতং, তথা চ, ব্যাসরাজাদিসম্মতদ্বৈতবাদখণ্ডনং যথাস্মিন্ গ্রন্থে কৃতং, ন তথান্যস্মিন্ কস্মিন্নপি গ্রন্থে পরিলক্ষ্যতে। সুদৃঢ়ঞ্চ যুক্তিজালমত্রাদ্বৈতসিদ্ধিকৃদ্ভিঃ প্রদর্শিতম্। এতাবতা বিশেষেণ ব্যাসরাজস্য ন্যায়ামৃতোক্তবিরুদ্ধবাদখণ্ডনেন, তথা চ, অদ্বৈতবাদপ্রতিষ্ঠাপনেনাদ্বৈতসিদ্ধি-গ্রন্থোঽদ্বৈতিনাং মহাদরণীয়তাং গত ইতি বিশেষেণ পরিলক্ষ্যতে।

নৈষ্কর্ম্যসিদ্ধিগ্রন্থবিষয়বিচার এবাস্য প্রবন্ধস্য মুখ্যবিষয়ঃ। তদর্থং সিদ্ধিগ্রন্থানাং, বিশেষেণসিদ্ধিগ্রন্থচতুষ্টয়স্য, বিষয়াঃ সংক্ষেপেণ প্রদর্শিতাঃ। তদ্বিষয়াণাং বিস্তৃতং সমালোচনমেকস্মিন্ কস্মিন্নপি প্রবন্ধে নৈব কর্তুং শক্যতে। অতএব দিগ্দর্শনমত্র কৃতম্। অত ইদানীং নৈষ্কর্ম্যসিদ্ধিগ্রন্থস্য বৈশিষ্ট্যং প্রদর্শনীয়ং, তদ্রচয়িতুশ্চ পরিচয়োঽপ্যবশ্যমেবালোচনীয় ইতি তদর্থ উত্তরা গ্রন্থ আরভ্যতে।

## ॥ নৈষ্কর্ম্যসিদ্ধিগ্রন্থস্য রচয়িতা চ, সুরেশ্বরাচার্য এব নৈষ্কর্ম্যসিদ্ধিগ্রন্থকার ইত্যত্রৈকমত্যপ্রদর্শনম্ ॥

ভগবৎপাদশঙ্করাচার্যশিষ্যেষু শ্রীসুরেশ্বরাচার্যো বিশিষ্টং স্থানং লেভে। নৈষ্কর্ম্যসিদ্ধিগ্রন্থঃ সুরেশ্বরাচার্যকৃত ইতি সর্বসম্মতম্, যদ্যপি সুরেশ্বরাচার্যমণ্ডনমিশ্রপাদয়োরভিন্নত্বমস্তি ন বেত্যত্র বিপ্রতিপত্তিরস্তি। বিবিধ-বিষয়েষ্বভিনবত্বপ্রদর্শনেন হেতুনা হ্যদ্বৈতেষু নৈষ্কর্ম্যসিদ্ধিগ্রন্থস্য বিশিষ্টং স্থানমস্তি। মুক্তৌ কর্মণাং সাক্ষান্নোপযোগিত্বং, জ্ঞানোদয়ে কর্মণাং নাশঃ, নিখিলং কর্মাবিদ্যোত্থমিতি নৈব কর্মাবিদ্যানাশায়ালম্, আত্মজ্ঞানার্থং কর্মণামারাদু-পকারকত্বং, ন তু সাক্ষাদুপযোগিত্বং, মোক্ষে হ্যবিদ্যানিবৃত্তৌ বা কর্মণাং নাস্তি সাক্ষাদাবশ্যক্যমিত্যেবংবিধা বহবো হ্যদ্বৈততত্ত্বপ্রতিপাদকা বিষয়া অস্মিন্ গ্রন্থে উপলভ্যন্তে। অত্রাবিদ্যানানাত্বং নিরাকৃত্যাবিদ্যাসংস্কারনাশার্থং প্রয়োজ-নানুরার্থং বা প্রসংখ্যানমাবশ্যকমিতি মতং নিরাকৃতম্। তদুক্তং, "নিরাকুর্যাৎ প্রসংখ্যানং দুঃখিত্বং চেৎ সুনিশ্চিতম্। প্রত্যক্ষাদিবিরুদ্ধত্বাৎ কথমুৎপাদয়েৎ প্রমাম্ ॥" ইতি (নৈ. সি., পু. সং., পৃ. ১৬০, শ্লো. ৩।৮৯)। অবিদ্যাসংস্কারনাশার্থং যত্নানুরকরণবৈফল্যমপি অত্রোক্তং, বিদ্যাস্মৃতেরেব তন্নাশকত্বাৎ। তদুক্তং,

"বাধিতত্বাদবিদ্যায়া বিদ্যাং সা নৈব বাধতে। তদ্বাসনানিমিত্তত্বং যাতি বিদ্যাস্মৃতের্ধ্রুবম্ ॥" ইতি (নৈ.সি., পু.সং., পৃ.২৬। শ্লো.১।৬৮)। মণ্ডনমিশ্রাদিসম্মতং শাব্দপরোক্ষজ্ঞানং নিরাকৃত্য 'তত্ত্বমস্যাদিমহাবাক্যজন্যজ্ঞানস্যৈবাত্মাহং-পরোক্ষজ্ঞানহেতুত্বং বৈশিষ্ট্যেন প্রতিপাদিতম্। তচ্চজ্ঞানং কারকগ্রামমনপেক্ষ্যৈবোদেতি। তদুক্তং, "এবং তত্ত্বমসীত্যস্মাদ্বৈতনং প্রত্যগাত্মনি। সম্যগ্‌জ্ঞাতত্ত্বমর্থস্য জায়তৈব প্রমা দৃঢ়া ॥" ইতি (নৈ.সি., পু.সং., পৃ.১৪৮, শ্লো.৩।৭০)। কর্মবাদিনাং মীমাংসকানাং জ্ঞানকর্মসমুচ্চয়বাদিনাঞ্চ মতং নিরাকৃত্য কাম্যনিষিদ্ধবর্জনপুরঃসরং নিত্যকর্মানুষ্ঠানং বুদ্ধেঃ প্রত্যক্প্রবণতামর্থাদ্ বিবিদিষামুৎপাদয়তীতি চ প্রদর্শ্য মোক্ষে কর্মণামারাদুপকারকত্বং, ন তু সাক্ষাদিতি বিস্পষ্টং প্রতিপাদিতম্। জ্ঞানকর্মণোর্বিরুদ্ধত্বেন সমকালীনত্বাভাবান্ নৈব কথমপি তয়োঃ সমুচ্চয়ঃ সমস্তি। তেন চ জ্ঞানকর্মসমুচ্চয়বাদো নৈবাহ্‌হস্পৃহাত্বং শক্যতে। তদুক্তং তত্র তৈঃ, "সংনিপত্য ন চ জ্ঞানং কর্মাজ্ঞানং নিরস্যতি। সাধ্যসাধনভাবত্বাদেককালানবস্থিতেঃ ॥" ইতি (নৈ.সি., পু.সং., পৃ.৩৪, শ্লো.১।৫৪)।

চতুরধ্যায়াত্মকো নৈষ্কর্ম্যসিদ্ধিগ্রন্থোঽয়ং সুরেশ্বরাচার্যপাদৈর্বিরচিতঃ, সুরেশ্বরাচার্যশ্চ শ্রীশঙ্করভগবৎপাদশিষ্য আসীদিত্যত্র প্রায়েণৈকমত্যমস্তি। সুরেশ্বরাচার্যপাদৈর্নৈষ্কর্ম্যসিদ্ধিগ্রন্থকর্তৃত্বং স্বাত্মন এব, শ্রীশঙ্করভগবৎপাদশিষ্যত্বঞ্চ তস্যেতি

বিস্পষ্টমুক্তম্। তদুক্তং নৈষ্কর্ম্যসিদ্ধিগ্রন্থ এব, "শ্রীমচ্ছঙ্করপাদপদ্মযুগলং সংসেব্য লব্ধোচিতান্। জ্ঞানং পারমহংস্যমমলং স্বান্তান্ধকারাপহম্ ॥" ইতি (নৈ.সি.,পু. সং.,পৃ.২০৩, শ্লো.৪।৭৪)। সুরেশ্বরাচার্যকৃতে তৈত্তিরীয়োপনিষদ্ভাষ্যবার্তিকেঽপ্যুক্তং, "তৈত্তিরীয়কসারস্য বার্তিকামৃতমুত্তমম্। মস্করীন্দ্রপ্রণীতস্য ভাষ্যস্যৈতদ্বিবেচনম্॥মুমুক্ষুসার্থবাহস্য ভবনাশভৃতো যতেঃ। শিষ্যশ্চকার তদ্ভক্ত্যা সুরেশাখ্যো মহার্থবিৎ ॥" ইতি (তৈ.ভা.বা.দি.সং., পৃ.২০৮, শ্লো.৩।৭০-৭১)। বৃহদারণ্যকভাষ্যবার্তিকস্যান্তিমভাগেঽপি সুরেশ্বরাচার্যৈর্বিস্পষ্টমেব স্বাত্মনো ভগবৎপাদশঙ্করশিষ্যত্বং স্বীকৃত্য বার্তিকমেতৎ স্বেনৈব কৃতমিত্যুল্লিখিতম্। তদুক্তং তত্রৈব, "ইতি দ্বাদশসাহস্রবার্তিকামৃতমীরিতমিতি শ্রীমৎপরমহংসপরিব্রাজকাচার্যশ্রীমচ্ছঙ্করভগবৎপূজ্যপাদশিষ্যশ্রীমৎসুরেশ্বরাচার্যকৃতৌ বৃহদ্বার্তিকপ্রস্থানে ষষ্ঠাধ্যায়ঃ।" ইতি (বৃ.ভা.বা., আ.সং., পৃ.২০৭৪)।

এতাবতা নৈষ্কর্ম্যসিদ্ধি - বৃহদারণ্যক - তৈত্তিরীয়োপনিষদ্ভাষ্যবার্তিকানাং রচয়িতা সুরেশ্বরাচার্য ইতি সুস্থিতম্। এতদ্গ্রন্থত্রয়স্য বিষয়পর্যালোচনেন তত্র বিশেষসাম্যদর্শনাৎ সুরেশ্বরাচার্যকৃতিরেবৈতদ্গ্রন্থত্রয়মিত্যপ্যুপলভ্যতে। বার্তিকদ্বয়ে বহুত্রৈব শ্লোকসাম্যং লক্ষ্যতে, বার্তিকস্থাঃ শ্লোকা অপি নৈষ্কর্ম্যসিদ্ধৌ পরিলক্ষ্যন্তে। তথাহি "সামানাধিকরণ্যাদের্ঘটেতরখয়োরিব। ব্যাবৃত্ত্যে

স্যাদবাক্যার্থঃ সাক্ষান্মুক্ত্যর্থয়োঃ ॥" ইত্যয়ং তৈত্তিরীয়োপনিষদ্ভাষ্যবার্ত্তিকস্থঃ শ্লোকঃ (তৈ.ভা.বা., দ্বি.সং., পৃ.১৬৫, শ্লো ২।৬৫৮) নৈষ্কর্ম্যসিদ্ধাবপি সংলক্ষ্যতে (নৈ.সি., পূ.সং., পৃ.১১৫, শ্লো.৩।৯)। এবমেব "বৃহস্পতিসবে যদ্বৎ ক্ষত্রিয়ো ন প্রবর্ত্ততে। ব্রাহ্মণত্বাদ্যহংমানী বিপ্রো বা ক্ষত্রকর্ম্মণি ॥ মৃৎস্নেভকে যথেভত্বং শিশুর্ধ্যস্য বলগতি। অধ্যস্যাত্মনি দেহাদীন্মূঢ়স্তদ্বদ্বিচেষ্টতে ॥" ইতি বৃহদ্বার্ত্তিকশ্লোকদ্বয়ং (বৃ.ভা.বা., আ.সং., পৃ.১১৮৭-৮৮) নৈষ্কর্ম্য-সিদ্ধাবপ্যুপলভ্যতে (নৈ.সি., পূ.সং., পৃ.৩৫-৩৬, শ্লো.১।৫৭,১।৫৯)। তথাহি "ত্যাগ এব হি সর্বেষাং মোক্ষসাধনমুত্তমম্। ত্যজতৈব হি তজ্জ্ঞেয়ং ত্যক্তুঃ প্রত্যক্পরং পদম্ ॥" (বৃ.ভা.বা., আ.সং., পৃ.৫১৫, ১০৩৮) ইতি বৃহদ্ভা-ষ্যবার্ত্তিকশ্লোকস্তৈত্তিরীয়োপনিষদ্ভাষ্যবার্ত্তিকস্য দ্বিতীয়াধ্যায়ে দশমশ্লোকরূপেণ লক্ষ্যতে। এবংরূপেণ ত্রিষষ্টিসংখ্যকশ্লোকানাং সাম্যং বার্ত্তিকদ্বয় উপলভ্যতে।

সুরেশ্বরাচার্য্যচরণানাং গার্হস্থ্যাশ্রমে বিশ্বরূপ ইতি নামধেয়মাসীদিতি বহুভির্মন্যতে। এতন্মতমবলম্ব্যৈব নৈষ্কর্ম্যসিদ্ধিগ্রন্থঃ সুরেশ্বরাচার্য্যবিরচিত ইতি পুরুষার্থপ্রবোধগ্রন্থ-কৃদ্ব্রহ্মানন্দভারতীমহোদয়েন স্বীক্রিয়তে। তদুক্তং তত্র পুরুষার্থপ্রবোধগ্রন্থে, "ইত্যেবং নৈষ্কর্ম্যসিদ্ধৌ ব্রহ্মাংশৈর্ব্রহ্মবিত্তমৈঃ। শ্রীমদ্ভির্বিশ্বরূপাখ্যৈরাচার্য্যৈঃ করুণার্ণবৈঃ ॥" ইতি।

 8508

এতাবতা সুরেশ্বরাচার্য এব নৈষ্কর্ম্যসিদ্ধিগ্রন্থকারঃ, তথা বৃহদারণ্য-কতৈত্তিরীয়োপনিষদ্ভাষ্যবার্ত্তিককার ইতি নিশ্চীয়তে ।

নৈষ্কর্ম্যসিদ্ধ্যাদিগ্রন্থকারাণাং সুরেশ্বরাচার্যপাদানামিতিবৃত্তং কীদৃশমাসীদিতি বিচারং বিনা তদ্বিষয়কং বিবিধমালোচনং নৈব সঙ্গতমিতীত্যত উত্তরো গ্রন্থঃ প্রবর্ত্ততে ।